









श्रीमत् वेदान्त रामानुज मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् श्रीवास योगीश्वर गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रीरङ्गनाताह्वय मुनिकृपया प्राप्त मोक्षाश्रमं तं
श्रीमत् वेदान्त रामनुज मुनिमपरम् संश्रये देशिकेन्द्रम्



श्रीमत् श्रीवास योगीश्वर मुनि करुणालब्ध वेदान्त युग्मम्
श्रीमत् वेदान्त रामानुज गुरुपदयोर्पित स्वात्मभारम्
श्रीमत् श्रुत्यन्त रामानुज यति नृपतेः प्राप्त मोक्षाश्रमं तं
श्रीमत् श्रीवास रामनुजमुनिं संश्रये ज्ञानवार्धिम्



वेदान्त लक्ष्मण मुनीन्द्र कृपात्त बोधम्
तत्पाद युग्म सरसीरुह भृङ्गराजम्
त्रय्यन्त युग्म कृतभूरि परिश्रमं तं
श्रीरङ्ग लक्ष्मणमुनिम् शरणं प्रपद्ये

# श्री स्तोत्र रत्नम्

***shrI stotra ratnam***

# श्री स्तोत्र रत्नम्

**श्रीमान् वेङ्कटनाथार्यः कवितार्किक केसरी। वेदान्तचार्य वर्यो मे सन्निधत्तां सदा हृदि॥**

स्वादयन्निह सर्वेषां त्रय्यन्तार्थं सुदुर्ग्रहम्। स्तोत्रयामास योगीन्द्रः तं वन्दे यामुनाह्वयम्॥

यत्पदां भोरुहध्यान विध्वस्ताशेष कल्मषः। वस्तुतां उपयातोहम् यामुनेयं नमामि तम्॥

नमो नमो यामुनाय यामुनाय नमो नमः। नमो नमो यामुनाय यामुनाय नमो नमः॥

नमो अचिन्त्य अद्भुत अक्लिष्ट ज्ञानवैराग्य राशये।
नाथाय मुनये अगाध भगवद् भक्ति सिन्धवे॥ [1]

तस्मै नमो मधु जिदङ्घ्रि सरोज तत्त्व - ज्ञानानु राग महिमाति शयान्त सीम्ने।
नाथाय नाथमुनये अत्र परत्र चापि - नित्यं यदीय चरणौ शरणं मदीयम्॥ [2]

भूयो नमो अपरिमिताच्युत भक्ति तत्त्व - ज्ञान अमृताब्धि परिवाह शुभैर्-वचोभिः।
लोके अवतीर्ण परमार्थ समग्र भक्ति - योगाय नाथमुनये यमिनां वराय॥ [3]

तत्त्वेन यश्चित् अचिदीश्वर तत्-स्वभाव - भोगापवर्ग तदुपाय गतीरुदारः।
संदर्शयन् निरमिमीत पुराण रत्नं - तस्मै नमो मुनिवराय पराशराय॥ [4]

माता पिता युवतयस्-तनया विभूतिः - सर्वं यदेव नियमेन मदन्वयानां।
आद्यस्य नः कुलपतेर्-वकुलाभिरामं - श्रीमत् तदङ्घ्रि-युगलं प्रणमामि मूर्ध्ना॥ [5]

यन्मूर्ध्नि मे श्रुति शिरस्सु च भाति यस्मिन् - अस्मन् मनोरथ पथः सकलः समेति।
स्तोष्यामि नः कुलधनं कुलदैवतं तत् - पादारविन्दम् अरविन्द विलोचनस्य॥ [6]

तत्त्वेन यस्य महिमार्णव शीकराणुः - शक्यो न मातुमपि शर्व पिता-महाद्यैः।
कर्तुं तदीय महिम स्तुतिम् उद्यताय - मह्यं नमोऽस्तु कवये निरपत्रपाय॥ [7]

# श्री स्तोत्र रत्नम्

यद्वा श्रमावधि यथामति वाऽप्यशक्तः - स्तौम्येवम् एव खलु तेपि सदा स्तुवन्तः ।
वेदाश् चतुर्मुख मुखाश्च महार्णवान्तः - को मज्जतोर् अणुकुलाचलयोर् विशेषः ॥ [8]

किञ् चैष शक्ति अतिशयेन न त्ऽनुकम्प्यः - स्तोताऽपि तु स्तुति कृतेन परिश्रमेण ।
तत्र श्रमस्तु सुलभो मम मन्दबुध्देः - इत्- उद्यमो अयम् उचितो मम चाब्ज-नेत्र ॥ [9]

नावेक्षसे यदि ततो भुवनान्यमूनि - नालं प्रभो भवितुमेव कुतः प्रवृत्तिः ।
एवं निसर्ग सुहृदि त्वयि सर्व-जन्तोः - स्वामिन् न चित्रम् इदम् आश्रित-वत्सलत्वम् ॥ [10]

स्वाभिविक अनवधिकातिशय इशितृत्वं - नारायण त्वयि न मृष्यति वैदिकः कः ।
ब्रह्मा शिवः शतमखः परमः स्वराडिति - एतेऽपि यस्य महमार्णव विप्रुषस्ते ॥ [11]

कः श्रीः श्रियः परम सत्त्व समाश्रयः कः - कः पुण्डरीक नयनः पुरुषोत्तमः कः ।
कस्या युतायुत शतैक कलांश-कांशे - विश्वं विचित्र चिदचित् प्रविभाग-वृत्तम्१ ॥ [12]

वेदापहार गुरुपातक दैत्यपीडादि - आपद् विमोचन महिष्ठ फलप्रदानैः ।
कोऽन्यः प्रजा पशुपति परिपाति कस्य पादोदकेन स शिवः स्व शिरोधृत् न ॥ [13]

कस्योदरे हरविरिञ्चि मुखः प्रपञ्चः - को रक्षतीममजनिष्ट च कस्य नाभेः ।
क्रान्त्वा निगीर्य पुनरुद्गिरति त्वदन्यः - कः केन वैष परवानिति शक्य शङ्कः ॥[14]

त्वां शील रूप चरितैः परमप्रकृष्ट - सत्त्वेन सात्त्विकतया प्रबलैश्च शास्त्रैः ।
प्रख्यातदैव परमार्थ विदां मतैश्च - नैवासुर प्रकृतयः प्रभवन्ति बोद्धुम् ॥ [15]

उल्लङ्घित त्रिविध सीम समातिशायि - संभावनं तव परिब्रढिम स्वभावम् ।
मायाबलेन भवताऽपि निगूह्य-मानं - पश्यन्ति केचित् अनिशं त्वद् अनन्यभावाः ॥ [16]

यदण्ड मण्डान्तर गोचरं च यत् - दशोत्तराण्य आवरणानि यानि च ।
गुणाः प्रधानं पुरुषः परं पदं - परात्परं ब्रह्म च ते विभूतयः ॥ [17]

# श्री स्तोत्र रत्नम्

वशी वदान्यो गुणवान् ऋजुः शुचिः - मृदुर्-दयालुर्-मधुरः स्थिरः समः ।
कृती कृतज्ञः त्वमसि स्वभावतः - समस्त कल्याण गुणामृतोदधिः ॥ [18]

उपर्युपर्य अब्ज भुवोऽपि पूरुषान् - प्रकल्प्य ते ये शतम् इति अनुक्रमात् ।
गिरस्-त्वद्-एकैक गुणावधीप्सया - सदा स्थिता नोद्यमतो अतिशेरते ॥ [19]

त्वदाश्रितानां जगद्-उद्भव-स्थिति - प्रणाश संसार विमोचनआदयः ।
भवन्ति लीला विधयश्च वैदिकाः - त्वदीय गम्भीर मनोऽनुसारिणः ॥ [20]

नमो नमो वाङ्मनसाति भूमये - नमो नमो वाङ्मनसैक भूमये ।
नमो नमो अनन्त महाविभूतये - नमो नमो अनन्त दयैक सिन्धवे ॥ [21]

न धर्म निष्ठोस्मि न चात्मवेदि - न भक्तिमान् त्वत्-चरणारविन्दे ।
अकिञ्च अनन्य गतिः शरण्य - त्वत्-पाद मूलं शरणं प्रपद्ये ॥ [22]

न निन्दितं कर्म तदस्ति लोके - सहस्रशो यन्न मया व्यधायि ।
सोऽहं विपाकावसरे मुकुन्द - क्रन्दामि सम्प्रत्यगतिस्-तवाग्रे ॥ 23]

निमज्जतोऽनन्त भवार्णवान्तः - चिराय मे कूलमिवासि लब्धः ।
त्वयाऽपि लब्धं भगवन्निदानीं - अनुत्तमं पात्रमिदं दयायाः ॥ [24]

अभूत पूर्वं मम भावि किं वा - सर्वं सहे मे सहजं हि दुःखम् ।
किं तु त्वदग्रे शरणागतानां - पराभवो नाथ न तेऽनुरूपः ॥ [25]

निरासकस्यापि न तावद्-उत्सहे - महेश हातुं तव पाद पङ्कजम् ।
रुषा निरस्तोऽपि शिशुः स्तनन्धयः - न जातु मातुश्चरणौ जिहासति ॥ [26]

तवामृत-स्यन्दिनि पाद पङ्कजे - निवेशितात्मा कथं अन्यदिच्छति
स्थिते अरविन्दे मकरन्द निर्भरे - मधुव्रतो नेक्षुरकं हि वीक्षते ॥ [27]

त्वद्-अङ्घ्रिम्-उद्दिश्य कदापि केनचित् - यथा तथा वाऽपि सकृत् कृतोऽञ्जलिः ।
तदैव मुष्णाति अशुभान्यशेषतः - शुभानि पुष्णाति न जातु हीयते ॥ [28]

उदीर्ण संसार दवा शुशुक्षणिम् - क्षणेन निर्वाप्य परां च निर्वृतिम् ।
प्रयच्छति त्वत्-चरण-अरुणाम्बुज - द्वयानु रागामृत सिन्धुशीकरः ॥ [29]

विलास विक्रान्त परावरालयम् - नमस्यद्-आर्ति क्षपणे कृतक्षणम् ।
धनं मदीयम् तव पाद पङ्कजम् - कदा नु साक्षात् करवाणि चक्षुषा ॥ [30]

कदा पुनः शङ्ख रथाङ्ग कल्पक - ध्वजार विन्दाङ्कुश वज्र लाञ्छनम् ।
त्रिविक्रम त्वत्-चरणाम्बुज द्वयम् - मदीय मूर्धानं अलङ्करिष्यति ॥ [31]

विराजमान-उज्ज्वल पीतवाससं - स्मितात सीसून समामलच्छविम् ।
निमग्न नाभिं तनुमध्यं उन्नतं - विशाल वक्षस्स्थल शोभि लक्षणम् ॥ [32]

चकासतं ज्याकिण कर्कशैः शुभैः - चतुर्भिराजानु विलम्बिभिर्-भुजैः
प्रिया वतंसोत्पल कर्ण भूषण - श्लथालका बन्ध विमर्द शंसिभिः ॥ [33]

उदग्र पीनांस विलम्बि कुण्डल - अलकावली बन्धुर कम्बुकन्धरम् ।
मुखश्रिया न्य-कृत पूर्ण निर्मल - अमृतांशु बिम्बां बुरुहोज्ज्वलश्रियम् ॥ [34]

प्रबुद्ध मुक्तांबुज चारुलोचनं - सविभ्रम भ्रूलतं उज्ज्वलाधरम् ।
शुचिस्मितं कोमल गण्डं उन्नसम् - ललाट पर्यन्त विलम्बितालकम् ॥ [35]

स्फुरत् किरीटाङ्गद हार कण्ठिका - मणीन्द्र काञ्ची गुण नूपुरादिभिः ।
रथाङ्ग शङ्खासि गदा धनुर्वरैः - लसत्तुलस्या वनमालयोज्ज्वलम् ॥ [36]

चकर्थ यस्या भवनं भुजान्तरं - तव प्रियं धाम यदीय जन्म-भूः ।
जगत् समस्तं यद्-अपाङ्ग संश्रयं - यदर्थं अम्भोधिः अमन्थ्य बन्धि च ॥ [37]

# श्री स्तोत्र रत्नम्

स्ववैश्व रूप्येणे सदाऽनुभूतयापि - अपूर्ववद् विस्मयम् आदधानया ।
गुणेन रूपेण विलास चेष्टितैः - सदा तवैवोचितया तव श्रिया ॥ [38]

तया सहासीनं अनन्त भोगिनि - प्रकृष्ट विज्ञान बलैक धामनि ।
फणा मणिव्रात मयूख मण्डल - प्रकाशमानोदर दिव्य धामनि ॥ [39]

निवास शय्यासन पादुकां शुक -उपधान वर्षातप वारणादिभिः ।
शरीर भेदैः तव शेषतां गतैः - यथोचितं शेष इतीरिते जनैः ॥ [40]

दासः सखा वाहनमासनं ध्वजः - यस्ते वितानं व्यजनं त्रयीमयः ।
उपस्थितं तेन पुरो गरुत्मता - त्वदङ्घ्रि सम्मर्द किणाङ्क शोभिना ॥ [41]

त्वदीय भुक्तोज्झित शेष भोजिना - त्वया निसृष्टात्म भरेण यद्-यथा
प्रियेण सेनापतिना न्यवेदि तत् - तथानुजानन्तम् उदार-वीक्षणैः ॥ [42]

हताखिल क्लेशमलैः स्वभावतः - त्वद्-आनुकूल्यैक-रसैः तवोचितैः ।
गृहीत तत्-तत् परिचार साधनैः - निषेव्यमाणं सचिवैः यथोचितम् ॥ [43]

अपूर्व नानारस भाव निर्भर - प्रबुध्दया मुग्ध विदग्ध लीलया ।
क्षणाणुवत् क्षिप्त परादिकालया - प्रहर्षयन्तं महिषीं महा भुजम् ॥ [44]

अचिन्त्य दिव्याद्भुत नित्य यौवन - स्वभाव लावण्यमय अमृतोदधिम् ।
श्रियः श्रियं भक्त जनैक जीवितम् - समर्थं आपत्सखं अर्थि कल्पकम् ॥ [45]

भवन्तम् एवानुचरन् निरन्तरं - प्रशान्त निश्शेष मनोरथान्तरः ।
कदाहं ऐकान्तिक नित्य किङ्करः - प्रहर्शयिष्यामि सनाथ जीवितः ॥ [46]

धिग्-अशुचिम् अविनीतं निर्दयं माम् अलज्जं - परम पुरुष योऽहं योगिवर्य अग्रगण्यैः ।
विधि शिव सनकाद्यैः ध्यातुम् अत्यन्त दूरं - तव परिजन भावं कामये कामवृत्तः ॥ [47]

# श्री स्तोत्र रत्नम्

अपराध सहस्त्र भाजनं - पतितं भीम भवार्णवोदरे ।
अगतिं शरणागतं हरे - कृपया केवलम् आत्मसात्कुरु ॥ [48]

अविवेक घनान्ध दिङ्मुखे - बहुधा सन्तत दुःख वर्षिणि ।
भगवन् भव दुर्दिने पथः - स्खलितं माम् अवलोकयाच्युत ॥ [49]

न मृषा परमार्थमेव मे - श्रृणु विज्ञापनं एकम् अग्रतः ।
यदि मे न दयिष्यसे ततः - दयनीयस्तव नाथ दुर्लभः ॥ [50]

तदहं त्वदृते न नाथवान् - मदृते त्वं दयनीयवान् न च ।
विधि निर्मितं एतमन्वयम् - भगवन् पालय मास्म जीहपः ॥ [51]

वपुरादिषु योऽपि कोऽपि वा - गुणतोऽसानि यथा तथाविधः ।
तदयं तव पाद पद्मयोः - अहमद्यैव मया समर्पितः ॥ [52]

मम नाथ यदस्ति योऽस्म्यहं - सकलं तद्धि तवैव माधव ।
नियतस्वम् इति प्रबुध्दधीः - अथवा किं नु समर्पयामि ते ॥ [53]

अवबोधितवान् इमां यथा - मयि नित्यां भवदीयतां स्वयम् ।
कृपयैव मनन्य भोग्यतां - भगवन् भक्तिमपि प्रयच्छ मे ॥ [54]

तव दास्य सुखैक सङ्गिनां - भवनेषु अत्सु अपि कीट जन्म मे ।
इतरावसथेषु मा स्म भूत् - अपि मे जन्म चतुर् मुखात्मना ॥ [56]

सकृत् त्वदाकार विलोक नाशया - तृणी कृतान् उत्तम भुक्ति मुक्तिभिः ।
महात्मभिः मां अवलोक्यतां नय - क्षणेपि ते यद्विरहोऽतिदुः सहः ॥ [57]

# श्री स्तोत्र रत्नम्

न देहं न प्राणान् न च सुखम् शेषाभिलषितं
न चात्मानं नान्यत् किमपि तव शेषत्व विभवात् ।
बहिर्भूतं नाथ क्षणमपि सहे यातु शतधा
विनाशं तत् सत्यम् मधु मथन विज्ञापनम् इदम् ॥ [58]

दुरन्तस्यानादेः अपरिहरणीयस्य महतः
निहीनाचार्ऽहं नृपशुर् अशुभस्यास्पदम् अपि ।
दयासिन्धो बन्धो निरवधिक वात्सल्य जलधे
तव स्मारं स्मारं गुणगणं इतीच्छामि गतभीः ॥ [59]

अनिच्छन्नप्येवम् यदि पुनरितीच्छन्निव रजस्
तमश् छन्नश् छत्मस्तुति वचन भङ्गीमरचयम् ।
तथापीत्थं रूपं वचनम् अवलम्ब्यापि कृपया
त्वमेवैवं भूतं धरणीधर मे शिक्षय मनः ॥ [59]

पिता त्वं माता त्वं दयित तनयस्त्वं प्रिय सुहृत्
त्वमेव त्वं मित्रं गुरुरसि गतिश्चासि जगताम् ।
त्वदीयः त्वद्भृत्यः तव परिजनः त्वद् गतिरहम्
प्रपन्नश्चैवं सत्यहमपि तवैवास्मि हि भरः ॥ [60]

जनित्वाऽहम् वंशे महति जगति ख्यात यशसां
शुचीनां युक्तानां गुण पुरुष तत्वस्थिति विदाम् ।
निसर्गा देव त्वच्चरण कमलैकान्त मनसाम्
अधोऽधः पापात्मा शरणद निमज्जामि तमसि ॥ [61]

# श्री स्तोत्र रत्नम्

अमर्यादः क्षुद्रः चलमतिः असूयाप्रसवभूः
कृतघ्नो दुर्मानि स्मरपरवशो वञ्चनपरः ।
नृशंसः पापिष्ठः कथं अहमितो दुःख जलधेः
अपारादुत्तीर्णः तव परिचरेयं चरणयोः ॥ [62]

रघुवर यद् भूस्त्वं तादृशो वायसस्य - प्रणत इति दयालुर्यच्च चैद्यस्य कृष्ण ।
प्रतिभवं अपराद्धुः मुग्ध सायुज्यदोऽभूः - वद किमपदमागः तस्य तेऽस्ति क्षमायाः ॥ [63]

ननु प्रपन्नः सकृदेव नाथ - तवाहं अस्मीति च याचमानः ।
तवानु कंप्यः स्मरतः प्रतिज्ञां - मदेक वर्जं किमिदं व्रतं ते ॥ [64]

अकृत्रिम त्वच्चरणारविन्द- - प्रेम प्रकर्षावधिं आत्म वन्तम् ।
पितामहं नाथमुनिं विलोक्य - प्रसीद मद्वृत्तं अचिन्तयित्वा ॥ [65]

**कवितार्किक-सिंहाय कल्याणगुणशालिने । श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः ॥**